✧˖⁺°*❋ ❋*°⁺˖✧

# गुरु पादुका स्तोत्रम्
# (Guru Paduka Stotram)

✧˖⁺°*❋ ❋*°⁺˖✧

# ॥ श्री गुरु पादुका स्तोत्रम् ॥

अनंत-संसार समुद्र-तार नौकायिताभ्यां गुरुभक्तिदाभ्याम् ।
वैराग्य साम्राज्यद पूजनाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥1॥

कवित्व वाराशिनिशाकराभ्यां दौर्भाग्यदावांबुदमालिकाभ्याम् ।
दूरिकृतानम्र विपत्ततिभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥2॥

नता ययोः श्रीपतितां समीयुः कदाचिद-प्याशु दरिद्रवर्याः ।
मूकाश्च वाचस्पतितां हि ताभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥3॥

नालीकनीकाश पदाहृताभ्यां नानाविमोहादि-निवारिकाभ्यां ।
नमज्जनाभीष्टततिप्रदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥4॥

नृपालि मौलिव्रजरत्नकांति सरिद्विराजत् झषकन्यकाभ्यां ।
नृपत्वदाभ्यां नतलोक पंक्ते: नमो नमः श्रीगुरुपादुकाभ्याम् ॥5॥

पापांधकारार्क परंपराभ्यां तापत्रयाहींद्र खगेश्वराभ्यां ।
जाड्याब्धि संशोषण वाडवाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥6॥

शमादिषट्क प्रदवैभवाभ्यां समाधिदान व्रतदीक्षिताभ्यां ।
रमाधवांध्रिस्थिरभक्तिदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥7॥

स्वार्चापराणां अखिलेष्टदाभ्यां स्वाहासहायाक्षधुरंधराभ्यां ।
स्वांताच्छभावप्रदपूजनाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥8॥

कामादिसर्प व्रजगारुडाभ्यां विवेकवैराग्य निधिप्रदाभ्यां ।
बोधप्रदाभ्यां द्द्रुतमोक्षदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥9॥

≪ ◦ ❈ ◦ ≫

# Guru Paduka Stotram

Ananta-saṁsāra samudra-tāra naukāyitābhyāṁ guru-bhaktidābhyām।
Vairāgya sāmrājyada pūjanābhyāṁ namo namaḥ śrīgurupādukābhyām ||1||

Kavitva vārāśiniśākarābhyāṁ daurbhāgyadāvāṁbudamālikābhyāṁ।
Dūrikṛtānamra vipattatibhyāṁ namo namaḥ śrīgurupādukābhyām ||2||

Natā yayoḥ śrīpatitāṁ samīyuḥ kadācid-pyāśu daridravaryāḥ।
Mūkāśca vācaspatitāṁ hi tābhyāṁ namo namaḥ śrīgurupādukābhyām ||3||

Nālīkanīkāśa padāhṛtābhyāṁ nānāvimohādi-nivārikābhyāṁ।
Namajjanābhīṣṭatipradābhyāṁ namo namaḥ śrīgurupādukābhyām ||4||

Nṛpāli maulivrjaratnakānti saridvirājat jhaṣakanyakābhyāṁ।
Nṛpatvadābhyāṁ nataloka paṁkteḥ namo namaḥ śrīgurupādukābhyām ||5||

Pāpāndhakārārka paraṁparābhyāṁ tāpatrayāhīṁdra khageśvarābhyāṁ।
Jāḍyābdhi saṁśoṣaṇa vāḍavābhyāṁ namo namaḥ śrīgurupādukābhyām ||6||

Śamādiṣaṭka pradavaibhavābhyāṁ samādhidāna vratadīkṣitābhyāṁ।
Ramādhavāṁdhristhirabhaktidābhyāṁ namo namaḥ śrīgurupādukābhyām ||7||

Swārcāparāṇāṁ akhileṣṭadābhyāṁ
swāhāsahāyākṣadhuraṁdharābhyāṁ।
Swāntācchabhāvapradapūjanābhyāṁ namo namaḥ
śrīgurupādukābhyām ||8||

Kāmādisarpa vrajagāruḍābhyāṁ vivekavairāgya nidhipradābhyāṁ।
Bodhapradābhyāṁ dṛtamokṣadābhyāṁ namo namaḥ
śrīgurupādukābhyām ||9||

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧